**ಕರ್ನಾಟಕ ಪ್ರೌಢಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ**

ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು–560003.

**KARNATAKA SECONDARY EDUCATION EXAMINATION BOARD**

Malleshwaram, Bengaluru – 560003.

**2020-21 ಸಾಲಿನ ಮಾದರಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ - 2**

**2020-21 MODEL QUESTION PAPER - 2**

**ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ – ಸಂಸ್ಕೃತ** | **ವಿಷಯ ಸಂಕೇತ : 16-S**

**Subject : FIRST LANGUAGE SANSKRIT** | **Subject Code : 16-S**

**ಅವಧಿ : 3 ಗಂಟೆ 15 ನಿಮಿಷ** | **ಗರಿಷ್ಠ ಅಂಕಗಳು : 100**

**Time : 3 hrs. 15 minutes** | **Max. Marks : 100**

**ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗೆ**

**Regular Fresh**

---

## परीक्षार्थिनां सामान्यसूचना:

1) अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) वस्तुनिष्ठाः विषयनिष्ठाश्च प्रश्नाः सन्ति।

2) इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति। परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत। प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति पर्यालोचयत।

3) वस्तुनिष्ठानां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः।

4) प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति।

5) प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति। पञ्चदशनिमेषाः प्रश्न पत्रस्य पठनार्थं निर्धारिताः सन्ति।

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः। तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत। 6 x 1 = 6**

1) 'इन्द्रः' अस्य समानार्थकपदम् इदं भवति।

A) मृगराजः

B) देवराजः

C) पक्षिराजः

D) वृक्षराजः

2) 'प्रकाशः' अस्य विरुद्धार्थकपदम् इदं भवति।

A) तेजः

B) किरणः

C) तमः

D) कान्तिः

3) 'पुत्रः' अस्य स्त्रीलिङ्गरूपम् इदं भवति।

A) जननी

B) भार्या

C) भगिनी

D) पुत्री

4) 'अवदत्' अत्र एषः लकारः वर्तते।

A) लङ्लकारः

B) लिट्लकारः

C) लोट्लकारः

D) लृट्लकारः

5) सिन्धुलः धाराराज्ये राजा आसीत्।

अत्र रेखाङ्कितपदस्य प्रश्नवाचकपदम् इदं भवति।

A) कथम्

B) कदा

C) कुत्र

D) कुतः

6) 'ग्रामात्' अत्र एषा विभक्तिः अस्ति।

A) तृतीयाविभक्तिः

B) प्रथमाविभक्तिः

C) सप्तमीविभक्तिः

D) पञ्चमीविभक्तिः

**II. चतुर्थ पदं लिखत। 4 x 1 = 4**

7) आमलकः – वनस्पतिः :: नागवल्ली ........................

8) कीर्तिकायः – शिवाजीप्रभुः :: अभयदायिनी .................

9) नद्यः – समुद्रेऽस्तं गच्छन्ति :: विद्वान् .......................

10) सुनीतिः – ध्रुवस्य माता :: सुरुचिः ....................

**III. एकवाक्येन उत्तरं लिखत। 7 x 1 = 7**

11) वृत्रासुरं इन्द्रः केन जघान ?

12) मोघलचक्रवर्ती कः ?

13) कापालिकः कथम् आसीत् ?

14) आत्मतत्वज्ञानेन कस्य प्राप्तिः भवति ?

15) कीदृशम् औषधम् दुर्लभम् ?

16) ध्रुवस्य पिता कः ?

17) हिमलिङ्गं कदा दर्शनयोग्यं भवति ?

IV. **द्वित्रैः वाक्यैः उत्तरं लिखत।** **4 x 2 = 8**

18) अस्थियाचकम् इन्द्रं दधीचिः सानन्दं किम् अवदत् ?

19) पादपजातयः काः ? तासां जन्म कथं भवति ?

20) सतां सङ्गः किं किं करोति ?

21) ध्रुवः नारायणं साक्षात्कर्तुं कुत्र प्रस्थितः ? सन्तुष्टः भगवान् विष्णुः किम् अकरोत् ?

V. **सूचनानुसारम् उत्तरं लिखत।** **4 x 2 = 8**

22) सन्धिं विभज्य नाम लिखत।

a) छात्रो धावति

b) पपातैषः

23) विग्रहवाक्यं विलिख्य समासनाम लिखत।

a) हरिहरौ

b) त्यागधनः

अथवा

समासं कृत्वा समासनाम लिखत।

a) ग्रहस्य समीपम् =

b) करीणाम् इन्द्रः =

24) वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत।

a) माता क्षीरम् आनीतवती।

b) छात्रः अध्येतुं शालां गच्छति।

25) वाक्यदोषं परिहरत।

a) चन्द्र : भूमेः परितः प्रदक्षिणं करोति।

b) वीरस्य युद्धं रोचते।

## VI. संस्कृतभाषया अनुवादं कुरूत। 1 x 2 = 2

26) ಗ್ರಾಮದ ಹೊರಗೆ ಸುಂದರವಾದ ಸರೋವರವಿದೆ. ಸರೋವರದಲ್ಲಿ ಕಮಲಗಳು ಅರಳುತ್ತವೆ.

There is a beautiful lake in the outskirts of the village. Lotus bloom in the lake.

## VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरूत। 1 x 2 = 2

27) कावेरीनदी दक्षिणभारते प्रवहति। पर्वदिनेषु कावेरीनद्याः स्नानं पुण्यकरम् इति जनाः भावयन्ति।

## VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत। 4 x 3 = 12

28) किं भवेत्? मम समीपे।

कः पाठः? कः अवदत्? कम् अवदत्?

29) विज्ञानप्रदर्शिनीं द्रष्टुं गच्छाम।

कः पाठः? कः वदति? प्रदर्शिनी कुत्र आयोजिता?

30) सहसा वह्निमाविश।

कः पाठः? के ऊचुः? कम् ऊचुः?

अथवा

मया भोजो रक्षितः।

कः पाठः? कः वदति? कं वदति?

31) अहमस्य प्रदास्यामि परमं वरमद्भुतम्।

कः पाठः? कः वरं ददाति? कस्मै वरं ददाति?

**IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत। 2 x 3 = 6**

32) बल्लाळसेनः ।

33) डा।। के.एस्.नागराजन् ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकाभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत। 3 x 3 = 9**

34) एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।।

35) चित्तशान्तिदायिनी विरक्तिबुद्धिवर्धिनी
भेदभावनाशिनी जनेषु चैक्यकारिणी।
दुःखशोकहारिणी भवाम्बुधेश्च तारिणी
भारतीयभावना विवृद्धिमेतु भारते।।

36) बालार्काभिमुखो बालो बालार्क इव मूर्तिमान्।
ग्रहीतुकामो बालार्कं प्लवतेऽम्बरमध्यगः।।

अथवा

ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि।
फलं मत्वा हस्तिराजमभिदुद्राव मारुतिः।।

**XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत। 1 x 3 = 3**

37) ज्ञानामृतं पीत्वा तुष्टः।

अथवा

माघे मेघे गतं वयः।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत। 1 x 3 = 3**

38) मातेव रक्षति पितेव हिते नियुङ्क्ते।

**XIII. पद्यं पूरयत।** **1 x 4 = 4**

39) सुखस्य ..................................................................

......................................................................... ।

.........................................................................

.................................................................हि लोकः ।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत।** **3 x 4 = 12**

40) चन्नम्माराजारामयोः सम्भाषणं लिखत।

41) हनूमतः जननं बाल्यवृत्तान्तश्च पद्यानुगुणं लिखत।

42) भारतं संरक्षितुं सन्नद्धः योद्धा हिमवान् कथम्? इति विवृणुत।

अथवा

अमरनाथगुहाविषये का पुराणकथा अस्ति?

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत।** **1 x 4 = 4**

43) प्राचीनकाले कुचेलः इति कश्चित् द्विजः आसीत्। सः अतीव दरिद्रः आसीत्। सः बाल्ये श्रीकृष्णस्य वयस्यः आसीत्। एकदा कुचेलः कृष्णदर्शनार्थं द्वारकाम् अगच्छत्। तं दृष्ट्वा कृष्णः अतीव सन्तुष्टः अभवत्। सः कुचेलं गन्धमाल्यादिभिः आराधयत्। कृष्णस्य महिष्यः अपि तं कुचेलं सत्कारम् अकुर्वन्। ततः कृष्णः कुचेलं अपृच्छत्। भोः मित्र, भवता किम् आनीतम्? इति। कुचेलः लज्जमानः एव पृथुकान् अर्पितवान्। कृष्णः तेन एव सन्तुष्टः तस्मै धनधान्यादिकम् अयच्छत्। एवं कृष्णकुचेलयोः सख्यम् अतीव मधुरम् आसीत्।

**प्रश्नाः**

i) श्रीकृष्णस्य वयस्यः कः?

ii) कुचेलः कृष्णदर्शनार्थं कुत्र अगच्छत्?

iii) कुचेलः कान् समार्पयत्?

iv) कृष्णकुचेलयोः सख्यं कथम् आसीत्?

**XVI. पत्रं लिखत।** **1 x 5 = 5**

44) उत्तरकन्नडमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा अग्रजस्य विवाहार्थ दिनद्वयस्य विरामं सम्प्रार्थ्य वर्गोपाध्यायं प्रति विरामपत्रं लिखत।

अथवा

'भगवद्गीता' इति पुस्तकं प्रेषयितुं निवेद्य वाराणसीनगरस्य गीताप्रकाशनस्य व्यवस्थापकं प्रति आवेदनपत्रं लिखत।

**XVII. दशवाक्यैः प्रबन्धं लिखत।** **1 x 5 = 5**

45) परिसरसंरक्षणम्

अथवा

गणराज्योत्सवः ।